International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2022; 8(5): 10-13
© 2022 IJSR
www.anantaajournal.com
Received: 10-05-2022
Accepted: 16-06-2022

**Mangla Thakur**
Ph.D, Central Sanskrit University, New Delhi, India

**Corresponding Author:**
**Mangla Thakur**
Ph.D, Central Sanskrit University, New Delhi, India

# संस्कृतसाहित्ये ऋषिपरम्परा-हिमाचलप्रदेशस्य विशेषसन्दर्भे

**Mangla Thakur**

**भूमिका:** भारतवर्षे आर्याणां वासः हिमालयस्य स्वातनद्याः उपत्यकासु, सप्तसिन्धुप्रदेशे, उत्तर-दक्षिणपाञ्चालप्रदेशे चासीत्[1] तस्मादेव समग्रभू-भागोऽयम् आर्यावर्तः इत्युच्यते। किञ्च आर्याणां मूलस्थानं हिमालयप्रदेशाः सिद्धाः भवन्ति।[2] वैदिककालीनग्रन्थाः यथा- ऋग्वेदः, यजुर्वेदः, सामवेदः, अथर्ववेदः, ब्राह्मणग्रन्थाः, आरण्यकानि, उपनिषदः, वेदाङ्गानि, रामायणम्, महाभारतम्, पुराणानि, स्मृतिग्रन्थाः लौकिकसंस्कृतसाहित्यञ्च हिमालयस्य, अत्रत्यनदीनाम्, समाजस्य, संस्कृतेः, सभ्यतायाश्च भौगोलिकपक्षाणां द्योतकाः प्रमाणिततथ्यस्रोतांसि च वर्तन्ते। एतेषु ग्रन्थेषु आर्यावर्तस्य बहूनि ऐतिह्यस्रोतांसि विद्यमानानि सन्ति।

**बीजशब्दाः** हिमालयः, संस्कृताध्ययनपरम्परा, ऋषिपरम्परा, आर्याणां वासः, देवालयः, उपत्यकाः |

## प्रस्तावना

'हिमालयः' इति शब्दस्य उत्पतिर्विषयक ज्ञानं वेदादेव सम्प्राप्यते। वाचस्पत्यकोशे हिमालयं भारतस्य सीमापर्वतरुपेण स्वीकृतः।[3] ऋग्वेदे हिमालयस्य कृते हिमवान्, हिमवन्तः, हिमगिरिः, हिमवत्, हिमाद्रिसदृशानि भौगोलिकनामानि प्रयुक्तानि सन्ति।[4] हिमवन्तः' इति शब्दं अथर्ववेदे पर्वतानां उपाधिरूपेण उल्लिखितमस्ति।[5] हिमालयभूमिः स्वर्गभूमिरिति कथिता।[6]

---

[1] आचार्य चतुरसेन, वैदिक संस्कृति, पौराणिक प्रभाव, पृष्ठ. 115.

[2] एन्सियेन्ट इण्डियन हिस्टारिकल ट्रेडिशन्स, पृष्ठ 295-302

[3] वाचस्पत्यम्, पृष्ठ, 5428

[4] यस्येमे हिमवंतो महित्वा यस्य समुद्रं रसया सहाहुः।
यस्येमाः प्रदिशो यस्य बाहू कस्मै देवाय हविषा विधेम। ऋग्वेद, 10.121.4

[5] गिरियस्ते पर्वता हिमवन्तोरणयं ते पृथिवी स्योनमस्तु।
वभ्रुं कृष्णं रोहिणी विश्वरूपां ध्रुवां भूमिं पृथिवीमिन्द्रगुप्तां।
अजीतोहतोअक्षतोध्यष्ठज्ञं पृथिवीहम्॥ अथर्ववेदः, 12.1.11

[6] गंगाद्वारोत्तरं विप्र स्वर्गभूमिः स्मृताबुधैः। अन्यत्र पृथिवी प्रोक्ता गंगाद्वारोत्तरं बिना। इदमेव महाभाग स्वर्गद्वारं स्मृतं बुधैः। यस्य दर्शनमात्रेण विमुक्तो भवबंधनैः॥ स्कन्दपुराणम्, केदारखण्डः, 106.4

स्कन्दपुराणस्य केदारखण्डे हिमाचलस्य वैभववर्णनं समुचितरुपेण विहितः ऋषिभिः। [7] स्कन्दपुराणे हिमाचलक्षेत्रेऽस्मिन् स्वर्गभूम्यां सिद्धाः, तपस्विनः, महात्मानः, ऋषयः, मुनिगणाः, देव-गन्धर्व-नाग-किन्नराश्च वासमकुर्वन्। हिमाचलस्य उपत्यकासु साधनारतैः महर्षिभिः संस्कृतस्य अमूल्यग्रन्थानां रचना विहिता। एतेषाम् आधारेणैव भारतीयसंस्कृतिः सुरचिता सुसंवर्धिता च वर्तते या हि विश्वसंस्कृतिषु अग्रगण्या अद्वितीया श्रेष्ठतमा च उच्यते। हिमालयः वस्तुतः पृथिव्याः मानदण्डः इव राराजते।[8] हिमालयस्य प्रधानभागः एव हिमाचलतपोभूमिः वर्तते। प्राचीनकालादेव विभिन्नशास्त्राणाम् उद्गमस्थलीरूपेण प्रसिद्धायां हिमाचलभूमावस्मिन मनुः, जमदग्निः, परशुरामः, गौतमः, नारदः, दुर्वासाः, कपिलः, ऋष्यशृङ्गः, भृगुः[9], च्यवनः, मार्कण्डेयः, गर्गः, पुण्डरीकः, लोमशः, शाण्डिल्यः, याज्ञवल्क्यः, शौनक इत्यादयः महामनीषिणः अस्यां देवभूमौ तपः आचरितवन्तः। एतैः ऋषिभिः यत्र तपः विहितं तत्स्थानम् एतेषां नाम्ना एव सुविख्यातमभूत् आहोस्वित् तत्र एतेषाम् ऋषिप्रवराणां नाम्ना देवालयरचना अभूत् [10]। मनुमहाराजस्य स्थानं मन्वालयः (मनाली), जमदग्नेः स्थानं मलाणाग्रामः सिरमौरक्षेत्रञ्च, परशुरामस्थानं निरमण्डः, गौतमर्षेः गोशालः शाटः मनिहारश्च, नारदमुनेः नीणू-काण्डाग्रामौ, ऋषेः दुर्वाससः स्थानं पालगीग्रामः, कपिलमुनेः बशौणा-कलाथग्रामौ, ऋष्यशृङ्गस्य सकीरणनामकं स्थानम्, पितुः विभाण्डकर्षेः सोझाग्रामः, भृगोः पार्वती-उपत्यकायाः बनोगीग्रामः, च्यवनर्षेः शिल्लाग्रामः, ऋषेः मार्कण्डेयस्य थरास-मंगलौर-पेडचाग्रामाः, गर्गस्य सचाणी, कण्डा, खनयारगी, लहरानीग्रामश्च, पुण्डरीकस्य दनोगी, कथेउगी, बनोगीग्रामश्च, लोमशर्षेः दियो-विनन-बसोर-सरठीग्रामाः, शाण्डिल्यस्य शलीणग्रामः, याज्ञवल्क्यस्य ग्राहणग्रामः, धौम्यर्षेः जगतसुखग्रामः, ऋषिशौनकस्य स्रोहणग्रामः स्वस्थानरूपेण प्रसिद्धाः सन्ति, यत्र एतेषाम् ऋषीणां भव्यदेवालयेषु देवरूपेण पूजा विधीयते।

ऋग्वैदिककाले सिन्धोः सरस्वतीनदीपर्यन्तम् आर्याणां विस्तारः आसीत्। बह्व्यः नद्यः अस्मिन्नेव हिमाचलक्षेत्रे प्रवहन्त्यः इमां भूमिं पवित्रामकुर्वन्।[11] वर्तमानकालीनायाः विशालगङ्गायाः स्थितिवद् तदा सरस्वत्याः अपि वैशाल्यमासीत्। तस्मादेव सरस्वतीनदी 'नद्युत्तमा' इत्युपाधिना विभूषिता आसीत्।[12] वैदिककाले सरस्वत्याः अत्यधिकमहिमा आसीत्, यतः इयमेव परमपवित्रा मन्यते स्म। सप्तसिन्धुनदीनामपि जननीरूपेण[13] प्रसिद्धा सरस्वती गोवत् सर्वस्य पालिका आसीत्। [14] सूर्येण सप्तसिन्धोः प्रकाशनस्य स्पष्टवर्णनमपि ऋग्वेदे मिलति। [15] हिमाचले प्रवहन्त्याः अस्याः नदीतटे एव स्थित्वा अस्यैव जलं पीत्वा ऋषयः वेदमन्त्राणां साक्षात्कारं कृतवन्तः। एतेषामेव मन्त्राणाम् अद्भुदूर्जया हिमाचले विद्यमानैः रसिककविभिः प्रत्येकं जनमानसे संस्कृतसाहित्यस्य पृष्ठभूमिः विनिर्मिता। अस्य महत्तममुदाहरणमस्ति अत्रत्यः सामाजिकपरिवेशः। अयं परिवेशः पूर्णतः देवसंस्कृत्याधारितः अस्ति। अद्यापि अत्रत्यलोकपरम्परासु लोकगाथासु च संस्कृतवाङ्मयस्य नानापक्षाः सजीवाः दृश्यन्ते।

विविधपुराणेष्वपि वर्णितानां बहूनाम् ऋषीणां तपस्थलीरूपेणापि इयं देवभूमिः प्रसिद्धा वर्तते। तद्यथा-महर्षिकश्यपस्य पौत्रः विभाण्डकमहर्षेः पुत्रः शृङ्गा-ऋषिः अभूत्, येन विहितेन पुत्रेष्टियज्ञेनैव राजा दशरथः रामादिसन्तानान् समवाप्नोत्। नैकजनश्रुतिभिः वर्तमानपूजापद्धतिभिः परम्पराभिश्च शृङ्गा-ऋषेः मूलस्थानं कुल्लुजनपदस्य संकीरणजोत मन्यते। अत्र भार्यया सह अद्यापि तेषां मूर्तिः विराजिता वर्तते, येषां स्थानीयलोकैः पूजनं क्रियते। [16] इत्थं शृङ्गा-ऋषेः पिता विभाण्डकमहर्षिरपि देवतारूपेण परम्परागतविधिभिः कुल्लुजनपदे बंजारक्षेत्रस्य सोझाग्रामे पूज्यते।[17]

ज्योतिषशास्त्रस्य अष्टादशप्रवर्तकेषु अन्यतमस्य लोमश-ऋषेः स्थानं हिमाचलस्य कुल्लुजनपदे सराजकोठ्यां वर्तते। [18]

---

[7] खण्डाः पञ्च हिमालयस्य कथिताः नेपाल-कूर्माञ्चलौ।
केदारोऽथ जलन्धरोऽथ रुचिरकाश्मीरसंज्ञोऽन्तिमः॥ स्कन्दपुराण, मानसखण्डः।

[8] अस्त्युत्तरस्यां दिशि देवात्मा हिमालयो नाम नगाधिराजः।
पूर्वापरौ तोयनिधीवगाह्य स्थितः पृथिव्या इव मानदण्डः॥
कुमारसम्भवम्, 1, 1

[9] महाभारत-वनपर्व, 9.23

[10] स्कन्दपुराणम्, केदारखण्ड, 58.65

[11] ऋग्वेदः, 10.75.5

[12] ऋग्वेद. 2.41.16.

[13] ऋग्वेद. 7.36.6.

[14] ऋग्वेद. 3.33.1.

[15] अष्टौ व्यख्यत् ककुभः पृथिव्यास् त्रीधन्वयोजनासप्तसिन्धून्॥” ऋग्वेद, 1.35.8

[16] कुल्लु की ऋषि परम्परा, पृष्ठ.1.

[17] तत्रैव, पृष्ठ.2

[18] तत्रैव, पृष्ठ.3

ऋषिरयम् अद्य देवतारूपेणात्र पूज्यते। लोमशमहर्षेः माहात्म्यं महाभारते समुपलभ्यते।[19] यस्मिन् महर्षिरयं वनमागत्य शिवात् अर्जुनस्य पाशुपतास्त्रप्राप्तेः वृत्तान्तं समस्तपाण्डवेभ्यः अन्येभ्यः ऋषिभ्यश्च श्रावयति। सुप्रसिद्धग्रन्थस्य भृगुसंहितायाः प्रवर्तकस्य भृगुमहर्षेः निवासस्थानं कुल्लुजनपदस्य कोटकण्डी-बडोगीनामके स्थाने वर्तते। यत्र मन्दिरगर्भगृहे नारायणविग्रहेन सहैव अयं महर्षिरपि विराजमानः अस्ति।[20]

ऋषेः जमदग्नेः मूलनिवासः कुल्लुजनपदस्य मलाणाग्रामे वर्तते। जमदग्निमहर्षेः विवरणं महाभारते भृगुनन्दनरूपेण प्राप्यते।[21] महर्षिमार्कण्डेयस्य ज्ञानस्य तपसः वैदुष्यस्य च वर्णनं महाभारतस्य वनपर्वणि प्राप्यते[22]। अयम् ऋषिः कुल्लुजनपदस्य रूपी-उपत्यकायाः हवाई-शियाहग्रामयोः देवतारूपेण पूज्यते।[23] महाकविकालिदासेनापि कुमारसम्भवे हिमाचलं देवभूमिरुपेण उक्तमस्ति।[24]

महर्षिवसिष्ठस्य प्रसिद्धं मन्दिरं मनालीसन्निकटे वसिष्ठनामके स्थाने वर्तते। इदमप्यत्र अवधेयं यत् केवलं रोहतांग-मनालीस्थानयोः मध्ये एव षण्महर्षीणां तपस्थल्यः विद्यमानाः सन्ति। रोहतांगशिखरे व्यासस्य, मनालीक्षेत्रे मनोः, गोशालास्थाने गौतमस्य, बरुआक्षेत्रे जमदग्नेः, व्यासस्य वामतटे भृगु-वसिष्ठयोश्च स्थानानि वर्तन्ते। वसिष्ठः लोकपितामहस्य मानसपुत्रः आसीत्। अनेन तपोबलेन इन्द्रियाणि स्ववशमानीय काम-क्रोधादिप्रवृत्तिषु विजयः प्राप्तः। जमदग्निमहर्षिः सरस्वतीतटस्य समीपवर्तिनि कुरुक्षेत्रे वसति स्म।[25] मनुः जलप्लावनकाले सूर्यतापस्य अभिवर्धनेन सप्तर्षिभिः सह हिमालयस्य मध्यभागं समवाप्तः। इत एव पुनः सृष्टिः आविर्भूता।[26] इमे सर्वे महर्षयः मनालीक्षेत्रात् रोहतांगपर्यन्तम् अत्यन्तं श्रद्धया पूज्यन्ते। एतेषाम् ऋषीणां परम्परा एव अत्रत्यशास्त्राध्ययनपरम्परामपि द्योतयति।

## निष्कर्ष

तथ्यानामेतेषामाधारेण अनुमातुं शक्नुमः यत् देवभूमिहिमाचले इमे महर्षयः एव संस्कृतसाहित्यज्ञानं शास्त्रीयचिन्तनं च प्रसारितवन्तः। हिमालयस्य बहुषु आश्रमेषु तपोवनेषु च ऋषिभिः कृत तपमाध्यमेन भारतीयसंस्कृतिः सुस्मृद्धा सुसम्पन्ना च जाता। अद्यापि अत्रत्यसमाजः पूर्णश्रद्धया परम्परागतरीतिभिः एतैः देवरूपैः ऋषिभिः प्रदत्तान् ज्ञानरूपोपदेशान् पालयन्तः स्वजीवनम् आह्लादपूर्वकं यापयन्ति। वैदिकसभ्यतायाः, संस्कृतेः, वैदिकऋचानां साहित्यिकमहत्त्वं च हिमाचलस्य जनमानसमोपरि प्रभावः दृश्यते। हिमाचलस्य विभिन्नासु उपत्यकासु मानवचिन्तनस्य या साहित्यधाराः प्रादुर्भूता सा समग्रजगतः प्राणिनः स्वशीतलज्ञानधारया आप्लावितवती। अत एव भारतवर्षस्य इतिहासे हिमाचलप्रदेशस्य महत्त्वपूर्णं स्थानं वर्तते। यद्यपि विदेशीयानाम् आक्रमणकारिणां कारणाद् इयं शास्त्राध्ययनाध्यापनपरम्परा विखण्डिता अभूत् तथापि विविधशास्त्रमर्मज्ञानां सिद्धानां मुनीनाञ्च अत्र स्थितिः इदमेव द्योतयति यत् हिमाचलप्रदेशे वेदपुराणकाले सुविकसिता संस्कृताध्ययनपरम्परा आसीदिति।

## सन्दर्भग्रन्थसूचिः


1. *अथर्ववेद.* (प्रथम संस्करण). विश्वबन्धु. होशियारपुर: विश्वेशवरानन्द वैदिकशोधसंस्थानम्, १९६१.
2. *कुमारसम्भवम्,* कालिदासः (सं०,व्या०) सुधाकर मालवीयः. वाराणसी: चौखम्बाकृष्णदास अकादमी, २०१८
3. *गोसावी, कृष्ण नारायण.हिमालय दर्शन,* दिल्ली: आत्माराम एण्ड सन्स, १९६३.
4. *ठाकुर, सुरत, कुल्लू की ऋषि परम्परा.* कुल्लू: भारतीय इतिहास संकलन समिति, २००५
5. *युग-युगीन त्रिगर्त.* रविप्रकाश आर्य (सं०), हि.प्र.: भारतीय इतिहास संकलन योजना समिति, २००१
6. *मियां, गोवर्धनसिंह.हिस्ट्री ऑफ हिमाचलप्रदेश.* नई दिल्ली: युगबोध पब्लिशिंग हाऊस, १९८२.
7. *शर्मा, केशव, हिमाचलप्रदेश का संस्कृतसाहित्य.* शिमला: हिमाचल कला संस्कृति भाषा अकादमी, २००६.
8. *स्कन्दपुराणम्* (केदारखण्डम्), शिवानन्द नौटियाल (अनुवादक). प्रयागः हिन्दी साहित्य सम्मेलन, २००९.
9. *सांस्कृत्यायन, राहुल, हिमालय परिचय,* इलाहाबाद: लॉ जर्नल प्रैस,......
10. *सारस्वत ओमप्रकाश, संस्कृत काव्य में लोकदृष्टि.* दिल्ली: निर्मल पब्लिकेशन, २००२.


---

[19] महाभारतम्,वनपर्व. 91.1

[20] तत्रैव,पृष्ठ.15

[21] महाभारतम्, वनपर्व. 115.44

[22] महाभारतम्, वनपर्व. 25.5

[23] कुल्लु की ऋषि परम्परा, पृष्ठ.37

[24] पितुः प्रदेशास्तव देवभूमयः॥ कुमारसम्भवम्,5.45

[25] वेद और वैदिक काल, पृष्ठ.117

[26] तत्रैव, पृष्ठ. 109

11. *श्रीविष्णुमहापुराणम्*, शिवप्रसादद्विवेदी (संपादक एवं व्याख्याकार). वाराणसीः चौखम्बासुरभारतीप्रकाशनम्, २०२०.
12. *श्रीमार्कण्डेयपुराणम्*, (भाषाटीकासहितम्). वाराणसी: चौखम्भाविद्याभवनप्रकाशनम्, २०१८